# Narayana Upanishad in Sanskrit / Hindi – नारायणोपनिषत

ओं सह नाववतु । सह नौ भुनक्तु ।
सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ॥
ओं शान्तिः शान्तिः शान्तिः ॥

ओं अथ पुरुषो ह वै नारायणोऽकामयत प्रजाः सृजेयेति ।
नारायणात्प्राणो जायते । मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ।
नारायणाद्ब्रह्मा जायते ।
नारायणाद्रुद्रो जायते ।
नारायणादिन्द्रो जायते ।
नारायणात्प्रजापतयः प्रजायन्ते ।
नारायणाद्द्वादशादित्या रुद्रा वसवस्सर्वाणि
च छन्दांसि ।
नारायणादेव समुत्पद्यन्ते ।
नारायणे प्रवर्तन्ते ।
नारायणे प्रलीयन्ते ॥

Panotbook.com

ओम् । अथ नित्यो ना॑राय॒णः । ब्र॒ह्मा ना॑राय॒णः ।

शि॒वश्च॑ नाराय॒णः । श॒क्रश्च॑ नाराय॒णः ।

द्या॒वा॒पृ॒थि॒व्यौ च॑ नाराय॒णः । का॒लश्च॑ नाराय॒णः ।

दि॒शश्च॑ नाराय॒णः । ऊ॒र्ध्वश्च॑ नाराय॒णः ।

अ॒धश्च॑ नाराय॒णः । अ॒न्त॒र्ब॒हिश्च॑ नाराय॒णः ।

नारायण एवे॑दग्ं स॒र्वम् ।

यद्भू॒तं यच्च॒ भव्यम् ।

निष्कलो निरञ्जनो निर्विकल्पो निराख्यातः शुद्धो देव

एको॑ नाराय॒णः । न द्वि॒तीयो॑ऽस्ति॒ कश्चि॑त् ।

य ए॑वं वे॒द ।

स विष्णुरेव भवति स विष्णुरे॑व भ॒वति ॥

ओमित्य॑ग्रे व्या॒हरेत् । नम इ॑ति प॒श्चात् ।

ना॒रा॒य॒णायेत्यु॑परि॒ष्टात् ।

ओमि॑त्येका॒क्षरम् । नम इति॑ द्वे अ॒क्षरे ।

ना॒रा॒य॒णायेति पञ्चाक्षरा॒णि ।

एतद्वै नारायणस्याष्टाक्ष॑रं प॒दम् ।

यो ह वै नारायणस्याष्टाक्षरं प॑दमध्ये॒ति ।

अनपब्रवस्सर्वमा॑यु॒रेति ।

विन्दते प्रा॑जाप॒त्यग्ं रायस्पोष॑ं गौप॒त्यम् ।

Panotbook.com

ततोऽमृतत्वमश्नुते ततोऽमृतत्वमश्नुत इति ।
य एवं वेद ॥

प्रत्यगानन्दं ब्रह्म पुरुषं प्रणवस्वरूपम् ।
अकार उकार मकार इति ।
तानेकधा समभरत्तदेतदोमिति ।
यमुक्त्वा मुच्यते योगी जन्मसंसारबन्धनात् ।
ओं नमो नारायणायेति मन्त्रोपासकः ।
वैकुण्ठभुवनलोकं गमिष्यति ।
तदिदं परं पुण्डरीकं विज्ञानघनम् ।
तस्मात्तदिदावन्मात्रम् ।
ब्रह्मण्यो देवकीपुत्रो ब्रह्मण्यो मधुसूदनोम् ।
सर्वभूतस्थमेकं नारायणम् ।
कारणरूपमकार परब्रह्मोम् ।
एतदथर्व शिरोयोऽधीते प्रातरधीयानो
रात्रिकृतं पापं नाशयति ।
सायमधीयानो दिवसकृतं पापं नाशयति ।
माध्यन्दिनमादित्याभिमुखोऽधीयान:पञ्चपातकोपपातका त्प्रमुच्यते
।
सर्व वेद पारायण पुण्यं लभते ।

Parrotbook.com

नारायणसायुज्यम॑वाप्नो॒ति॒ नारायण सायुज्यम॑वाप्नो॒ति॒ ।
य ए॑वं वे॒द । इत्यु॑प॒निष॑त् ॥

ओं स॒ह ना॑ववतु । स॒ह नौ॑ भुनक्तु ।
स॒ह वी॒र्यं॑ करवावहै ।
ते॒ज॒स्विना॒वधी॑तमस्तु॒ मा वि॑द्विषा॒वहै॑ ॥
ओं शान्ति॒ः शान्ति॒ः शान्ति॑ः ॥

इति श्री नारायणोपनिषत् ॥

Panotbook.com